# Adrirajakritam Mahadevi Stotram

# અદ્રિરાજકૃતં મહાદેવીસ્તોત્રમ્

## Document Information

Text title : Adrirajakritam Mahadevi Stotram

File name : adrirAjakRRitaMmahAdevIstotram.itx

Category : devii, devI, tAmraparNImAhAtmya, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 1/46-60||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# અદ્રિરાજકૃતં મહાદેવીસ્તોત્રમ્

સૌન્દર્યસિન્ધુસમ્ભૂતચન્દ્રરેખામિવ સ્થિતામ્ ।
ઉપસૃત્ય મહાદેવીં ભીતભીત ઇવાદ્રિરાટ્ ॥ ૪૬॥

પ્રણમ્ય શિરસા ભૂમૌ ભૂયો ભૂયઃ પ્રસાદયન્ ।
તુષ્ટાવાશેષજનનીં વિશેષવિદુષીમિમામ્ ॥ ૪૭॥

અમ્બ વિશ્વમ્ભરે માતઃ પ્રસીદ પરમેશ્વરિ ।
પ્રસીદ કરુણાપાઙ્ગસંરક્ષિતચરાચરે ॥ ૪૮॥

બ્રહ્મોપેન્દ્રરુદ્રાદ્યૈઃ સ્તૂયમાનમહોદયે ।
સમસ્તભુવનાપાયવ્યપોહનકૃતોદ્યમે ॥ ૪૯॥

નમસ્તુભ્યં મહાદેવિ માયામોહિતદાનવે ।
પાપભઞ્જનપાણ્ડિત્યપાદામ્બુજરજઃકણે ॥ ૫૦॥

સર્ગાદૌ જગતાં સાક્ષાત્કથ્યતે પ્રકૃતિઃ પરા ।
વૈખરીતિ તતો ભાસિ વાચિ વાચસ્પતેરપિ ॥ ૫૧॥

વૈખારિકાણીન્દ્રાય ત્વયા દૃષ્ટાનિ ચાત્મનઃ ।
ત્વયાઽઽદૌ વિહિતો બ્રહ્મા રજસા સર્ગસિદ્ધયે ॥ ૫૨॥

ત્વાં વદન્તિ પુનર્વેદાઃ સ્થિત્યૈ નારાયણાત્મિકામ્ ।
વિશ્વવિધ્વંસનવિધૌ મહારુદ્રકલાત્મિકામ્ ॥ ૫૩॥

કલાકાષ્ઠમુહૂર્તાશ્ચ રાશિનક્ષત્રપઙ્ક્તયઃ ।
ત્વદંશવિહિતા વેદાઃ તત્ત્વવાક્યપ્રમાણતઃ ॥ ૫૪॥

ભોગીનાં ભોગજનની મુમૂક્ષાણાં ચ મોક્ષદા ।
કર્મકાલગુણાતીતા મર્યાદાવ્યક્તરૂપિણી ॥ ૫૫॥

ત્વયિ સર્વમિદં વિશ્વં ત્વદાજ્ઞાગૌરવાશ્રયમ્ ।
યજન્તિ ત્વાં સુરાસ્સર્વે ધ્યાયન્તિ હૃદિ યોગિનઃ ॥ ૫૬॥

આરાધયન્તિ કર્મિષ્ઠાઃ દ્રવ્યૈઃ તત્ત્વસમુદ્ભવૈઃ ।
અન્વિષ્યમાણા નિગમૈઃ આગમૈર્મન્ત્રગર્ભિતૈઃ ॥ ૫૭॥

લબ્ધૈવ ભાસિ દુર્લભ્યા સુલભ્યા પરમેશિતુઃ ।
એવં ત્વમધુના ભાસિ માદૃશાં દૃષ્ટિગોચરા ॥ ૫૮॥

આશ્ચર્યમિવ પશ્યામિ હ્યન્ધલબ્ધો મણિર્યથા ।
અમ્બ ભીતોઽસ્મિ નિતરાં ત્વદ્રૂપાલોકનાદહમ્ ॥ ૫૯॥

ત્વામહં દારિકાં લબ્ધ્વા વાઞ્છામિ સુખમાસિતુમ્ ।
તથા પ્રસીદ માતસ્ત્વં એષ એવ વરો મમ ॥ ૬૦॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે પ્રથમાધ્યાયાન્તર્ગતં
અદ્રિરાજકૃતં મહાદેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૧/૪૬-૬૦॥

tAmraparNImAhAtmya . adhyAya 1/46-60..

Proofread by PSA Easwaran

---

*Adrirajakritam Mahadevi Stotram*
pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*